# परीहार्यमीमांसा

मुनिनेमिविजय-मुनिआनन्दसागर

॥ श्रीः ॥

॥ श्रीवीतरागाय नमः ॥

येनाऽक्षालि सुभव्यमानसतमोलेपः सुधासोदरैः
सूक्ताम्भोभिरदर्शि दर्शनमनुक्रोशाकरेणाऽऽत्मना ॥
स्याद्वादाभिधमन्यपक्षदलनप्रौढं सुसिद्धिप्रदं
ध्यायावो जगतां हितं जिनवरं धर्मप्रदानोद्यतम् ॥१॥

हिमांशुकिरणप्रभामदविलासहासोद्यते
यदीययशसि श्रुते न मधुरा सुधा श्लाध्यते ।
सुभव्यजनताज्ञतातमसि सूरचर्यापरः
स **वृद्धिविजयो** जयत्वतुलमुक्तियुक्तो मुनिः ॥२॥

श्रीमज्जन्मादिकल्याणकपवित्रीकृतवाराणसीक्षेत्र-मिथ्यात्वतिमिरदूरीकरणसहस्रकिरणायमान-भव्यजनविषमगदागदंकारा-ऽऽसन्नसिद्धभव्यजन-चेतश्चमत्कारकारिसंसारपारावारतरणि-भूमिपालभालालङ्करणचारुचरणारविन्द-त्रिजगदवतंस-परमानन्दनिधानसम-कामवितरणाधरीकृतकल्पद्रुम-श्रीमत्स्तम्भन-पार्श्वनाथसनाथीकृतात् **स्तम्भतीर्थात् मुनिनेमिविजयानन्दसागराभ्यां मि० जिकोबीमेक्सम्युलरान्** प्रति दत्तो धर्मलाभः समुल्लसतुतराम् ।

विशेषस्तु - समागतं वः पत्रं **मुम्बईपुर**वास्तव्य**श्राद्धखीमजीहीरजी**नामकं प्रति । तच्च **मुम्बईसमाचार**द्वारा वाचयित्वा ज्ञातवृत्तान्तावावां तत्प्रत्युत्तरं निविवेदयिषू पत्रमिदं लेखितुमुपक्रान्तवन्तौ स्वः । तथाहि-

यत्त्वाचाराङ्गीयार्थप्रकाशकाङ्गलदेशीयशब्दनिबद्धग्रन्थप्रपन्नभस्मादावस्थि-प्रक्षेपपूर्वकं मत्स्यमांसभोजनं कार्यमिति भवत्कृतद्वितीयश्रुतस्कन्धप्रथमाध्ययन-दशमोद्देशकीयसूत्रतात्पर्यार्थवर्णनवाचनचकित**कायानी**प्रेषितपत्रोत्तरे मत्स्यशब्द-प्रयोगस्य सर्वकोशसंदर्शनबलेन मीनातिरिक्तार्थतात्पर्यविषयकत्वेन वक्तु-मशक्यत्वादाचाराङ्गसूत्रस्य जिनकल्पिकमुनिमात्राचारप्रकाशकत्वेनाऽद्यतन-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जैनमुनिव्यवहाराविषयत्वेऽपि मांसादिभक्षणस्य प्राचीनजिनकल्पिकमुनिव्यवहारविषयत्वे बाधकाभावात् मांसमीनभक्षणमाचाराङ्गैतत्सूत्रसम्मतमिति भवद्भिरभ्यधायि तत्सर्वमसमञ्जसम् ।

**तिक्ता रिष्टा कटुर्मत्स्या, चक्राङ्गी शकुलादनी**

इति प्रसिद्धकलिकालसर्वज्ञ**श्रीमद्धेमचन्द्र**कोशदर्शितायाः प्रज्ञापनादिसिद्धान्तकोशप्रतिपादितैरावणवृकीशिखण्डन्यादिजीवसमानाभिधाननिरूपितवनस्पतिनिष्ठावाच्यतावत् सर्वकोशसन्दर्शनप्रतिज्ञाऽनिवारणीयमत्स्यशब्दवाच्यताया निर्बाधतयोपलब्धेः ।

**एवं मांस सूत्रमपि नेयम् । अस्य चोपादानं क्वचिल्लूताद्युपशमार्थं सद्वैद्योपदेशतो बाह्यपरिभोगेन स्वेदादिना ज्ञानाद्युपकारकत्वात्फलवद्दृष्टम् । भुजिश्चाऽत्र बाह्यपरिभोगार्थे, नाऽभ्यवहारार्थे, पदातिभोगवदिति छेदसूत्रेष्वभिप्रायो द्रष्टव्यः । एवं गृहस्थामन्त्रणादिविधिपुद्गलसूत्रमपि सुगममिति तदेवमादिना छेदसूत्राभिप्रायेण ग्रहणे सत्यपि कण्टकादिप्रतिष्ठापनविधिरपि सुगमः ।**

इत्याचाराङ्गैतत्सूत्रटीकापाठोक्तपदातिभोगस्थलप्रसिद्धबाह्यपरिभोगरूपभुजिधात्वर्थानाकलनात् जैनशास्त्रोपलभ्यमानाद्यतनमुन्याचारप्रतिपालनप्रयत्नाधिकतरप्रयत्नसाध्यकेवलोत्सर्गमार्गावलम्बिजिनकल्पिकमुन्याचारसत्त्वेन मांसादिभक्षणसंवलितजिनकल्पिकमुन्याचारविषयकवर्णनात्यन्तानुचितत्वात् ।

**जिनकप्पिया इत्थी न होइ**

इत्यादिपाठसूचितजिनकल्पानधिकारभिक्षुक्याचारप्रदर्शकाचाराङ्गसूत्रस्थ-

**से भिक्खू वा भिक्खुणी वा**

इत्याद्याऽऽजैनबालप्रसिद्धजिनकल्पिकस्थविरकल्पिकमुन्याचारविषयकाज्ञानतिमिरनिवारणसन्मार्तण्डमण्डलायमानस्थविरकल्पिकाचारप्रतिपादकसूत्रविषयकाऽऽर्यदेशानिवासाजायमानजैनगुरुविनयप्रयोज्याबोधविलसितत्वाच्च ।

अथ च तदर्थविषयकशाब्दबोधे तदर्थविषयकबोधजनकतात्वावच्छिन्नप्रकारतानिरूपितानुपूर्व्यवच्छिन्नविशेष्यताकवक्त्रिच्छाविषयकज्ञानत्वेन कारणत्वस्य भोजनसमयप्रयुक्त'सैन्धवमानये'तिवाक्यार्थबोधविषयताया अश्वत्वावच्छिन्ने वारणाय

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वीकरणीयतया तादृशकारणीभूतज्ञानजनकप्रकरणादिना लवणत्वावच्छिन्न-विषयकबोधवद् मांसशब्दतः प्रकरणवशात् स्वयंस्वीकृतफलादिगर्भबोधवद् योग्यस्थले तादृशान्यशब्दजन्यबोधनिष्पत्तिस्वीकारे दोषाभावस्य प्रसिद्धत्वात् तद्विषयकाधिकवर्णनप्रपञ्चेनाऽलम् ।

अपि च सदातनतीर्थङ्करसञ्चारादिपवित्रीकृतमहाविदेहक्षेत्रवर्तमान तीर्थङ्कर-श्रीसीमन्धरप्रणीतदशवैकालिकद्वितीयचूलिकास्थसप्तमगाथायां मुनीनां मद्यमांसभक्षणं सर्वथा निषिद्धम् । तथाहि–

**अमज्जमांसासि अमच्छरीय अभिक्खणं निव्विगइगया य**

अर्थस्त्वमद्यमांसाशी अमद्यपोऽमांसाशी च, न परसम्पद्द्वेषी, पुष्ट-कारणाभावे निर्गतविकृतिपरिभोगश्चेति; जैनसाधुरिति संबध्यते । अत्र च परिभोगोचितविकृतिनिषेधे अभीक्ष्णमिति विशेषणोपादानवत् मद्यमांसभक्षणनिषेधे तदनुपादानादिना जैनसिद्धान्ते कीदृशी मद्यमांसभक्षणनिषेधव्यवस्थाऽस्ति ? तत् स्वयमेवोह्यम् । येन कदाऽप्येतादृशानर्थाङ्कुरोद्भेदी न भविष्यतीत्याशास्वहे ।

एवमेव सूत्रकृताङ्गद्वितीयश्रुतस्कन्धद्वितीयाध्ययने मुन्याचारप्रस्तावे द्विचत्वारिंशद्दोषरहिताहाराहारित्वादि प्रतिपाद्य

**अमज्जमांसासिणो**

इति पाठेनैव सर्वथा स्फुटतरकृतं मद्यमांसभक्षणनिषेधमाकलय्य 'मांसाहारिणः प्राचीनमुनय आसन्नि'ति निःशङ्कं वदतां स्वयंकृताङ्ग्लभाषाविवरण-पुस्तकीयनवाद्रिराममितपृष्ठीयतथाविधमद्यमांसभक्षणनिषेधविस्मरणशालिनां मनो विप्रतीसारमियात् । अपि च विवाहप्रज्ञप्त्याख्य(भगवती)सूत्राष्टमशतकनवमोद्देशके गौतमगणधरपृष्टनैरयिकायुःकार्मणशरीरप्रयोगबन्धकारणं भगवता श्रीमहावीरेण मांसाहारः स्फुटं प्रतिपादितः तथा च तत्पाठः –

**णेरइयाउयकम्मासरिरप्पओगबंधेणं भंते ।। पुच्छा – गोयमा ! महारंभयाए महापरिग्गहयाए पंचिंदियवहेणं कुणिमाहारेणं णेरइयाउयकम्मा-सरिरप्पओगणामाए कम्मस्स उदयेणं णेरइयाउयकम्मासरिरजावप्पओगबंधे ॥**

एवमेव स्थानाङ्गसूत्रस्थचतुःस्थानकाख्यचतुर्थाध्ययने मांसभोजनं नरकफलककर्मतयोपवर्णितम् । तथा च तत्पाठः –

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**'चउहिं ठाणेहिं जीवा णेरइयत्ताए कम्मं पकरेंति । तं जहा - महारंभयाए महापरिग्गहयाए पंचिंदियवहेणं कुणिमाहारेणं'** इति

कुणिमशब्दस्तु मांसार्थः प्रसिद्ध एव ॥ तथा चौपपातिकसूत्रेपि मांसभक्षणकर्तुर्नरकावाप्तिरुपवर्णिता । तथा च तत्पाठः-

**चउहिं ठाणेहिं जीवा णेरइयत्ताए कम्मं पकरेंति, णेरइयत्ताए कम्मं पकरेत्ता णेरइएसु उववज्जंति । तं जहा-महारंभयाए महापरिग्गहयाये पंचिंदियवहेणं कुणिमाहारेणं ॥** इति

प्रवचनसारोद्धारेऽपि मधुमद्यमांसनवनीतान्यभक्ष्यतयोल्लिख्य वर्जनीयतया प्रतिपादितानि ।

तथा च तत्पाठः-

**पंचुंबरी चउविगइ, हिमविसकरगेयसव्वमट्टी य ।**
**रयणीभोयणगं चिय, बहुबीयमणंतसंधाणं ॥**
**घोलवडा वायंगण, अमुणियनामाणि णिफुल्लफलयाणि ।**
**तुच्छफलं चलियरसं, वज्जह वज्जाणि बावीसं ॥**

एवं मद्यमांसादिभक्षणनिषेधवचनामृतपरिषिक्तान्तःकरणनरकादिदुर्गत्व-गामिमुमुक्षवस्तदूत एव मनः समादधते । ये तु लालसादासास्तद्भक्षयन्ति तेषामुभयतः कर्मबन्धनं नरकपतनमनेकश्रवणकटुपरमाधार्मिककृतदुःखोपभोगं चोपवर्णयन्त्युत्तराध्ययनसूत्राणि-

**हिंसे बाले मुसावाई माइल्ले पिसुणे सढे ।**
**भुंजमाणे सुरं मंसं सेयमेयं ति मन्नई ॥९॥**

**कायसा वयसा मत्ते वित्ते गिद्धे य इत्थिसु ।**
**दुहओ मलं संचिणइ सिसुनागु व्व मट्टियं ॥१०॥ ( उ. अ. ५. )**

**इत्थीविसयगिद्धे य महारंभ-परिग्गहे ।**
**भुंजमाणे सुरं मंसं परिवूढे परंदमे ॥६॥**

**अयकक्करभोई य तुंदिल्ले चियलोहिए ।**
**आउयं नरए कंखे जहाऽऽएसं व एलए ॥७॥ ( उ. अ. ७ )**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**तत्ताइ तंबलोहाइं तउयाइं सीसगाणि य ।**
**पाइओ कलकलंताइं आरसंतो सुभेरवं ॥६९॥**

**तुहं पियाइं मंसाइं खंडाइं सोल्लगाणि य ।**
**खाविओ मि समंसाइं अग्गिवन्नाइं णेगसो ॥७०॥**

**तुहं पिया सुरा सीहू मेरओ य महूणिय ।**
**पाइओ मि जलंतीओ वसाओ रुहिराणि य ॥७१॥ ( उ. अ. १९ )**

अपि च सूत्रकृताङ्गीयद्वितीयश्रुतस्कन्धषष्ठाध्ययनैकोनचत्वारिंशत्तमगाथा-टीकायां-

मांसस्य हिंसामूलत्वामेध्यत्वरौद्रध्यानास्पदत्वादियावन्नरकगतिसाधन-त्वाभिधानपुरःसरं तद्भक्षयितॄ राक्षससमत्वसङ्कलितात्मद्रुहत्वमभिधाय मांसशब्द-निर्वचनप्रकाशनपूर्वकप्रेयवध्याश्रयतुच्छक्षणतृप्तिप्राणवियोगान्तरप्रदर्शनेन मांसादनस्य महादोषत्वं निरूप्य कुशला मांसादनाभिलाषरूपमन्तःकरणं न कुर्वन्तीत्यवगमय्य मांसभक्षणे न दोष इति भारत्या अपि मिथ्यात्वमग्रतःकृत्य मांसाशिनां दुर्गतिं तन्निवृत्तानां चेहैवानुत्तमश्लाघाऽमुत्र च स्वर्गापवर्गगमनं चेति प्रदर्शितम् । तथा च तत्पाठः-

**"हिंसामूलममेध्यमास्पदमलं ध्यानस्य रौद्रस्य यद्**
**बीभत्सं रुधिराविलं कृमिगृहं दुर्गन्धि पूयाविलम् ।**
**शुक्रासृक्प्रभवं नितान्तमलिनं सद्भिः सदा निन्दितं**
**को भुङ्क्ते नरकाय राक्षससमो मांसं तदात्मद्रुहः ॥१॥**

अपि च,

**मां स भक्षयिताऽमुत्र, यस्य मांसमिहाऽद्म्यहम् ।**
**एतन्मांसस्य मांसत्वं, प्रवदन्ति मनीषिणः ॥२॥**

तथा-

**योऽत्ति यस्य च तन्मांस-मुभयोः पश्यताऽन्तरम् ।**
**एकस्य क्षणिका तृप्ति-रन्यः प्राणैर्वियुज्यते ॥३॥**

**तदेवं महादोषं मांसदनमिति मत्वा यद् विधेयं तद् दर्शयति ।**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतदेवंभूतं मांसादनाभिलाषरूपं मनोऽन्तःकरणं कुशला निपुणा मांसाशित्वविपाकवेदिनस्तन्निवृत्तिगुणाभिज्ञाश्च न कुर्वन्ति, तदभिलाषादात्मनो निवर्तयन्तीत्यर्थः । आस्तां तावद् भक्षणं, वागप्येषा यथा 'मांसभक्षणेऽदोष' इत्यादिका भारत्यभिहितोक्ता मिथ्या, तुशब्दान्मनोऽपि तदनुमत्यादौ न विधेयमिति तन्निवृत्तौ चेहैवानुपमा श्लाघाऽमुत्र च स्वर्गापवर्गगमनमिति । तथा चोक्तम् -

श्रुत्वा दुःखपरम्परामतिघृणां मांसाशिनां दुर्गतिं
ये कुर्वन्ति शुभोदयेन विरतिं मांसादनस्याऽऽदरात् ।
सद्दीर्घायुरदूषितं गदरुजा संभाव्य यास्यन्ति ते
मर्त्येषूद्भटभोगधर्ममतिषु स्वर्गापवर्गेषु च'' इत्यादि ॥

सूत्रकृताङ्गीयप्रथमाध्ययनद्वितीयोद्देशके परव्यापादितपिशितभक्षण-विषयकदोषाभाववादिमतमनुमत्य प्रतिहतत्वकारणककर्मबन्धत्वेनाऽन्योक्त-सूक्तोपष्टम्भपूर्वकं तिरस्कृतम् । तथा हि —

''यदपि च तैः क्वचिदुच्यते । यथा - परव्यापादितपिशितभक्षणे परहस्ताकृष्टाङ्गारदाहाभाववन्न दोष इति, तदप्युन्मत्तप्रलपितवदनाकर्णनीयं, यतः - परव्यापादितपिशितभक्षणेऽनुमतिरप्रतिहताऽस्याश्च कर्मबन्ध इति । तथा चाऽन्यैरप्यभिहितम् -

अनुमन्ता विशसिता, संहर्ता क्रयविक्रयी ।
संस्कर्ता चोपभोक्ता च, घातकश्चाऽष्ट घातकाः'' ॥

एवं स्थानाङ्गसूत्रे दशस्थानकाख्यदशमाध्ययने यत्र मांसादि तत्र विशिष्टाध्ययनादि न कार्यमिति प्रतिपादितम् । तथा च तत्पाठः-

दसविहे ओरालिए असज्झाइए पण्णत्ते - अट्ठि मंसे सोणिए असुइसामंतं मसाणसामंतं चंदोवराए सूरोवराए पडणे रायवुग्गहे उवस्सवस्सअंतो ओरालिए सरीरे ॥

एवमादिनानाविधसिद्धान्तवचनवाचनपरिपूतदर्शनो मांसाद्याहारप्रतिषेधमेव सिद्धान्तानुमतं मन्येतेति निर्विवादमेवेति स्वप्रमादमवधार्य तदुत्थजनमनोविमोहन-बाधकं कोविदप्रसिद्धं प्रमादपरिमार्जनमथनमनुष्ठीयेतेति । शिवम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत् सूरस्य न शीतगोरपि करैर्मोहाभिधानं तमः
क्षीणं तत् सहसा यदीयकथया निर्म्मूलमुन्मूलितम् ।
पापोलूकविनोदरोधनिपुणं सद्युक्तिपादोज्ज्वलं
जीयात् तज्जिनशासनं त्रिजगति स्फीतप्रबोधप्रदम् ॥

## श्रमणोपासकापलापप्रकाशः ॥

यस्य मुखस्थितव्रणाङ्कपरम्परेव धर्मप्रचारसुषमापहारोद्यता दुस्तर्कपरम्परा यस्य च दिनमणिप्रभापटलायमानमपि धर्मप्रवचनं न तनूकरोति महामोहप्रवाहसरणिं यत्र चाऽखर्वगर्ववाडवावलीढतया धर्मप्रवाहः क्षणमपि व्यवस्थातुं न क्षमते सोऽयमाङ्ग्लबालायमानः श्रमणोपासको गौर्जरभाषया प्रलपितमाचरन् यदबालं तत्तु खण्डितमेव गुर्जरभाषाभिरेव तैस्तैः ।

यदपि च स्वाभिप्रेतविषयमतङ्गपञ्चास्यायमान 'न मांसभोजी' ति धर्मप्रवचनवाक्यार्थोऽन्यथोपवर्णनीयो मयेति बद्धपरिकरतया पदविद्याचातुरीमात्मनः प्रकाशयमानस्ताच्छील्येऽत्र णिनिरिति मांसभोजनशीलत्वमेव निषिध्यत इत्यर्थवर्णन-रूपाज्ञजनमनोमोहनमहेन्द्रजालं व्यतनुत, तदपि व्याकृतिविलासानभिज्ञानमूलकमेव । सिद्धहेमचन्द्रपाणिनीयव्याकरणस्य – "**अजातेः शीले**" "**सुप्यजातौ णिनिस्ताच्छील्ये**" इतिसूत्राभ्यामजातिवाचकोपपद एव ताच्छील्ये प्रत्ययस्य विधीयमानतया प्रकृते मांसशब्दस्य जातिवाचकत्वेन तदप्राप्तेः । अत एव ब्राह्मणानामन्त्रयिता, शालीन् भोक्तेत्यादौ ताच्छील्ये न तादृशप्रत्ययोत्पत्तिः ।

न च ताच्छील्यप्रत्ययविधायकसूत्रद्वयाप्रवृत्त्या तादृशप्रयोगासिद्धिरिति वाच्यम् । सिद्धहेमचन्द्रव्याकरणे '**ग्रहादिभ्यो णिन्नि**'ति सूत्रे ग्रहादीनामाकृति-गणत्वाङ्गीकारेण तादृशप्रयोगसिद्धेर्निर्विवादत्वात् । अत एव "**अमज्जमांसासि**" इति दशवैकालिकसूत्रप्रयोगोऽमद्यमांसाशी – अमद्यपोऽमांसाशी चेति तद्विवृत्तिश्च भगवद्धरिभद्रसूरिवरोक्ता सङ्गच्छते । अत एव सूत्रकृताङ्गीय-'**अमज्जमांसासिणो**' इतिसूत्रप्रतीकमुपादाय मद्यमांसं नाऽश्नन्तीति दीपिकाकारस्योक्तिरपि सङ्गच्छते ।

यच्च परित्यक्तमांसादनानां प्राचीनराजन्यानामपरिच्छिन्नवणिग्जा-त्याप्यायकत्वमासीदिति श्रमणोपासकेतिनामधारिणोक्तं, तत्र मांसभोजन-प्रतिषेधनियमाभावे परित्यक्तमांसादनानामिति राजन्यविशेषणस्य क उपयोग ?

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति तु पूर्वापरविरुद्धवक्ता स एव प्रष्टव्य इति केचित् ।

अपरे तु श्रमणोपासकवाक्यं पूर्वापरविरुद्धमपि तदिष्टप्राक्कालिक-जातिबन्धनाभाववन्तो यथा मांसाहारत्यागिनः स्वजातिं प्रवेशयन् तथाऽनार्यदेश-पर्यटनादिनाऽभिमतमांसभक्षणानां जातौ सङ्ग्रहीतारः । श्रीमद्धेमचन्द्रसूरिवराधिगत-जैनधर्मक्षेत्रपालसविधशरावस्थमांसस्थापकमार्गणपुरःसरशासितनड्डुपुरसामन्तक-गुरुपदेशवर्जितजैनधर्माङ्गीकारप्राक्कालभक्षितमांसस्मारकघृतपूरककुमारपालचरितं विस्मरन्तो हितं नाऽनुरुध्यन्त इति सूचयितुं कल्पत इति व्याचक्षत। इति शम् ॥

यस्योद्दामप्रमाणप्रवचनतरणिप्रौढभासा विलीने
पाखण्डध्वान्तजाले प्रसरति भुवने धर्मपद्मप्रबोधः ।
लीलावासो गुणानां जनकलुषमषीलेपलोपप्रसक्तो
जीयाच्छ्री**वृद्धिचन्द्रो**ऽतुलगुणमहिमा श्रीलमुक्त्या समेतः ॥

* * *

नालीकेष्वङ्कचन्द्रैरधिगतगणने वत्सरेऽवन्तिपस्य
मासीषेऽमातिथौ यत्स्खलितमिह बुधैर्यत्नतः शोधनीयम् ।
इत्यभ्यर्थ्य प्रवीणान् कलुषगदभिषक्पार्श्वनाथप्रसादा-
**न्नेम्यानन्द**प्रणीता प्रमदयतु **परीहार्यमीमांसिकेयम्** ॥

॥ ग्रन्थोऽयं समाप्तः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org